२०

अष्टाध्याय्याः पञ्चषष्ठौ अध्यायौ

प्रस्तावना

अस्मिन् पञ्चमे पाठे अष्टाध्याय्याः पञ्चमषष्ठाध्याययोः चितानि सूत्राणि व्याख्यास्यन्ते। पूर्वस्मिन् पाठे भवान् वैदिकव्याकरणे घ-तातिल्-वति इत्यादिप्रत्ययानां प्रयोगान् ज्ञातवान्। प्रस्तुतपाठे केषाञ्चन डट्, मट् इत्याद्यागमानां विवरणं करिष्यते। तज्ज्ञास्यते। छन्दसि बहुव्रीहिविषये नूतनाः नियमाः सूत्रव्याख्यानपुरस्सरम् प्रतिपादयिष्यन्ते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- बहुव्रीहिसम्बन्धिनियमान् ज्ञास्यति।
- खिद्-धातोः विकल्पेन एचः आकारविधानं ज्ञास्यति।
- दीर्घाज्जसि इचि च पूर्वसवर्णदीर्घस्य वैकल्पिकत्वं ज्ञास्यति।
- छन्दसि दन्तशब्दस्य बहुव्रीहौ दतृ-आदेशविधानम् अवगमिष्यति।
- स्य इत्यत्र कदा सलोपो भवति तज्ज्ञास्यति।

२०.१) थट् च छन्दसि॥ (५.२.५०)

सूत्रार्थः- नान्तादसंख्यादेः परस्य डटस्थट् स्यात् मट् च।

सूत्रावतरणम्- छन्दसि संख्यावाचिप्रातिपदिकात् डटः थट्-मट् इत्येतौ आगमौ विधातुम् सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- विधिसूत्रेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। थट् इति प्रथमान्तं पदम्। च इत्यव्ययपदम्। छन्दसि इति सप्तम्यन्तं पदम्। तस्य पूरणे डट् इति सूत्रात् डट् इति पदमनुवर्तते। तच्च षष्ठ्यन्ततया विपरिणमते। नान्तादसंख्यादेर्मट् इति सम्पूर्णं सूत्रमनुवर्तते। संख्यायाः गुणस्य निमाने मयट् इति सूत्रात् संख्यायाः इति पदमत्रानुवर्तते। ततश्च सूत्रार्थो भवति असंख्यादेः नान्तात् संख्यावाचकात् प्रातिपदिकात् परस्य डटः थट्-मट् आगमौ भवतः।

उदाहरणम्- पञ्चमम् पञ्चथम् चेत्यादीन्युदाहरणानि।

सूत्रार्थसमन्वयः- लोके संख्यावाचिप्रातिपदिकात् विहितस्य डटः स्थाने नान्तादसंख्यादेर्मट् इत्यनेन मट्-आगमो विधीयते। छन्दसि तु प्रकृतसूत्रेण तु थट्-आगमः मट्-आगमश्च विधीयते। तथा च पञ्चन् शब्दात् डट्प्रत्यये पञ्चन् अ इति दशायाम् प्रकृतसूत्रेण डटः थट्-आगमे थट्- प्रत्ययान्त्यस्य टकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां तस्य लोप इत्यनेन सूत्रेण च तस्य लोपे पञ्चन् थ् अ इति स्थिते न लोपः प्रातिपदिकान्तस्य इति सूत्रेण पञ्चन् शब्दस्य अन्त्यस्य नकारस्य लोपे पञ्च थ् अ इति स्थिते संयोगे निष्पन्नस्य पञ्चथ इति शब्दस्वरूपस्य तद्धितान्तत्वात् कृत्तद्धितसमासाश्च इत्यनेन तस्य प्रातिपदिकसंज्ञायां ततश्च ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिस्वादिप्रत्ययेषु प्राप्तेषु प्रथमैकवचनविवक्षायां सुप्रत्यये पञ्चथ सु इति स्थिते पञ्चथ शब्दस्य क्लीबलिङ्गे प्रवर्तमानत्वात् अतोऽम् इति सूत्रेण सुप्रत्ययस्य स्थाने अमादेशे पञ्चथ अम् इति जाते अम् इत्यस्य विभक्तिश्च इत्यनेन विभक्तिसंज्ञकत्वात् न विभक्तौ तुस्माः इति निषेधसूत्रस्य जागरूकत्वात् हलन्त्यम् इति सूत्रेण तस्य मकारस्य इत्संज्ञाभावे पञ्चथ अम् इति जाते अमि पूर्वः इत्यनेन पूर्वरूपे एकादेशे अकारे सर्ववर्णसम्मेलने च **पञ्चथम्** इति रूपं सिध्यति।

एवं च पञ्चन् अ इति दशायाम् प्रकृतसूत्रेण मट्-आगमे मट्- प्रत्ययान्त्यस्य टकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां तस्य लोपः इत्यनेन सूत्रेण च तस्य लोपे पञ्चन् म् अ इति स्थिते न लोपः प्रातिपदिकान्तस्य इति सूत्रेण पञ्चन्-शब्दस्य अन्त्यस्य नकारस्य लोपे पञ्च म् अ इति स्थिते संयोगे निष्पन्नस्य पञ्चम इति शब्दस्वरूपस्य तद्धितान्तत्वात् कृत्तद्धितसमासाश्च इत्यनेन तस्य प्रातिपदिकसंज्ञायां ततश्च ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिस्वादिप्रत्ययेषु प्राप्तेषु प्रथमैकवचनविवक्षायां सुप्रत्यये पञ्चम सु इति स्थिते पञ्चथ-शब्दस्य क्लीबलिङ्गे प्रवर्तमानत्वात् अतोऽम् इति सूत्रेण सुप्रत्ययस्य स्थाने अमादेशे पञ्चम अम् इति जाते अम् इत्यस्य विभक्तिश्च इत्यनेन विभक्तिसंज्ञकत्वात् न विभक्तौ तुस्माः इति निषेधसूत्रस्य जागरूकत्वात् हलन्त्यम् इति सूत्रेण तस्य मकारस्य इत्संज्ञाभावे पञ्चम अम् इति जाते अमि पूर्वः इत्यनेन पूर्वरूपे एकादेशे अकारे सर्ववर्णसम्मेलने च **पञ्चमम्** इति रूपं सिध्यति।

२०.२) बहुलं छन्दसि॥ (५.२.१२२)

सूत्रार्थः- मत्वर्थे विनिः स्यात्।

सूत्रावतरणम्- अस्-माया-मेधा-स्रजो विनिः इति सूत्रपठितप्रातिपदिकभिन्नप्रातिपदिकेभ्यः बहुलं विनिप्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- द्विपदात्मकं विधिसूत्रमिदम्। बहुलमिति प्रथमान्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। अस्-माया-मेधा-स्रजो विनिः इत्यस्मात् सूत्रात् विनिः इति प्रथमान्तं पदमनुवर्तते। तदस्यास्त्यस्मिन्निति सूत्रमत्रानुवर्तते। प्रातिपदिकात् प्रत्ययः परः चेति अधिकृतमस्ति। ततश्च सूत्रार्थो भवति छन्दसि तदस्यास्त्यस्मिन्निति अर्थे प्रातिपदिकात् बहुलं विनिः प्रत्ययः स्यात् इति।

विशेषः- अस्-माया-मेधा-स्रजो विनिः इत्यनेन सूत्रेण सूत्रोक्तेभ्यः अस्-प्रभृतिभ्यः शब्देभ्यः एव विनिप्रत्ययो विधीयते। तदतिरिक्तात् प्रातिपदिकात् न विधीयते। परन्तु अनेन सूत्रेण तदतिरिक्तात् प्रातिपदिकात् बहुलं विनिप्रत्ययो विधीयते। ननु किं नाम बहुलम् इति चेदुच्यते-

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥इति॥

कारिकार्थः - सूत्रप्रोक्तस्य कार्यस्य कुत्रचित् प्राप्तिः नास्ति तथापि तत्र प्रवृत्तिः स्यात्। किञ्च कुत्रचित् प्राप्तिः अस्ति किन्तु प्रवृत्तिः न भवति। अपि च क्वचित् विकल्पेन प्रवृत्तिः भवति। किञ्च कुत्रचिदन्यदेव भवति इति।

उदाहरणम्- तेजस्वी इत्युदाहरणम्।

सूत्रार्थसमन्वयः- तेजस्-शब्दात् अस्-माया-मेधा-स्रजो विनिः इत्यनेन विनिप्रत्ययो न विधीयते। यतो हि नायं शब्दः सूत्रे पठितः। परन्तु अनेन सूत्रेण तेजस्विन्-शब्दात् विनिप्रत्ययः विधीयते। अत्र बहुलम्-शब्दस्य प्रथमार्थः ग्राह्यः। तेजस् विनि इति स्थिते विनि-प्रत्ययस्य अन्त्यस्य इकारस्य अनुनासिकत्वेन पाणिनीयैः प्रतिज्ञातस्य उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण च तस्य लोपे संयोगे निष्पन्नस्य तेजस्विन्-शब्दस्वरूपस्य तद्धितान्तत्वात् कृत्तद्धितसमासाश्च इत्यनेन तस्य प्रातिपदिकसंज्ञायां ततश्च ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिस्वादिप्रत्ययेषु प्राप्तेषु प्रथमैकवचनविवक्षायां सुप्रत्यये सुप्रत्ययस्य उकारस्य च उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण तस्य लोपे तेजस्विन् स् इति स्थिते सर्वनामस्थाने चासम्बुद्धौ इति सूत्रेण इकारस्य दीर्घे ईकारे तेजस्वीन् स् इति जाते हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् इति सूत्रेण सकारस्य लोपे तेजस्वीन् इति जाते नलोपः प्रातिपदिकान्तस्य इत्यनेन नकारस्य लोपे **तेजस्वी** इति रूपम्।

२०.३) अमु च छन्दसि॥ (५.४.१२)

सूत्रार्थः- किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे प्रातिपदिकात् अमुः प्रत्ययः स्यात्।

सूत्रावतरणम्- किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे अर्थे प्रातिपदिकात् अमुप्रत्ययविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- पदत्रयात्मकम् विधिसूत्रमिदम्। अमु इति लुप्तप्रथमान्तं पदम्। च इत्यव्ययपदम्। छन्दसि इति सप्तम्यन्तं पदम्। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे इति सम्पूर्णं सूत्रम् अत्रानुवर्तते। प्रातिपदकात् प्रत्ययः चेति अधिकृतमस्ति। ततश्च सूत्रार्थो भवति छन्दसि किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे अर्थे अमुः प्रत्ययो भवतीति।

उदाहरणम्- प्रतरम् इत्युदाहरणम्। तत्र प्र-उपसर्गात् तरप्-प्रत्यये तरप्-प्रत्ययान्त्यस्य पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां तस्य लोपः इत्यनेन च तल्लोपे संयोगे निष्पन्नस्य प्रतरशब्दस्य तद्धितान्तत्वात् कृत्तद्धितसमासाश्च इत्यनेन सूत्रेण प्रातिपदिकसंज्ञायां ततः प्रकर्षे अर्थे छन्दसि

प्रकृतसूत्रेण अमुप्रत्यये अनुनासिकत्वेन पाणिनीयैः प्रतिज्ञातस्य अमुप्रत्ययस्य उकारस्य इत्संज्ञायां तस्य लोपः इति सूत्रेण च तस्य इत्संज्ञकस्य उकारस्य लोपे प्रतर अम् इति स्थिते यचि भम् इत्यनेन प्रतर इत्यस्य भसंज्ञायां यस्येति च इति सूत्रेण च रेफोत्तराकारस्य लोपे संयोगे **प्रतरम्** इति रूपम्। लोके तु **प्रतराम्।**

२०.४) बहुप्रजाश्छन्दसि च॥ (५.४.१२३)

सूत्रार्थः- छन्दसि बहुव्रीहौ बहुप्रजाः असिच्-प्रत्ययान्तः निपात्यते।

सूत्रावतरणम्- वेदे बहुप्रजाः इति असिच्-प्रत्ययान्तपदस्य निपातनार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- विधिसूत्रेऽस्मिन् सूत्रे त्रीणि पदानि सन्ति। बहुप्रजाः इति प्रथमान्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। च इति अव्ययपदम्। नित्यमसिच्प्रजा-मेधयोः इत्यस्मात् सूत्रात् असिच् इति अनुवर्तते। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् इत्यस्मात् सूत्रात् बहुव्रीहौ इति पदमनुवर्तते। प्रातिपदिकात् प्रत्ययः परः चेति अधिकृतमस्ति। निपात्यते इति आक्षेपात् लभ्यते। निपातनं नाम किमिति चेत् सिद्धप्रक्रियस्य निर्देशो हि निपातः। ततश्च सूत्रार्थो भवति छन्दसि बहुव्रीहौ बहुप्रजाः इति शब्दः असिच्-प्रत्ययान्तः समासान्तः च निपात्यते इति।

उदाहरणम्- अस्य असिच्-प्रत्ययान्तस्य निपातितस्य बहुप्रजा-शब्दस्य प्रयोगः वेदे उपलभ्यते। तथा च अस्य प्रयोगः **बहुप्रजाः** निर्ऋतिमाविवेश्च इति। लोके तु **बहुप्रजः**।

२०.५) छन्दसि च॥ (५.४.१४२)

सूत्रार्थः- दन्तस्य दतृशब्दः स्याद् बहुव्रीहौ।

सूत्रावतरणम्- छन्दसि दन्तशब्दस्य बहुव्रीहौ दतृ-आदेशविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- विधिसूत्रेऽस्मिन् सूत्रे द्वे पदे स्तः। छन्दसि इति सप्तम्यन्तं पदम्। च इत्यव्ययपदम्। वयसि दन्तस्य दतृ इति सूत्रात् दन्तस्य दतृ चेति पदद्वयमत्रानुवर्तते। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् इत्यस्मात् सूत्रात् बहुव्रीहौ इति पदमनुवर्तते। प्रातिपदिकात् प्रत्ययः परः चेति अधिकृतमस्ति। ततश्च सूत्रार्थो भवति छन्दसि बहुव्रीहौ दन्तस्य दतृ आदेशः स्यादिति।

उदाहरणम्- उभयतोदतः।

सूत्रार्थसमन्वयः- उभयतः दन्ताः येषामिति विग्रहे बहुव्रीहिसमासे उभयतस् दन्त इति स्थिते प्रकृतसूत्रेण अनेकाल्शित्सर्वस्य इति परिभाषया परिष्कृतेन दन्त इत्यस्य दतृ इत्यादेशे उभयतस् दत् इति स्थिते सकारस्य रुत्वे उकारे उभयत उ दत् इति स्थिते संयोगे निष्पन्नात् उभयतोदत्-प्रातिपदिकात् सौ विभक्तिकार्ये उभयतोदतः इति रूपम्।

२०.६) ऋतश्छन्दसि॥ (५.४.१५८)

सूत्रार्थः- ऋदन्तात् बहुव्रीहेर्न कप्।

सूत्रावतरणम्- छन्दसि बहुव्रीहौ ऋदन्तात् प्रातिपदिकात् कप्-प्रत्ययनिषेधार्थं सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- विधिसूत्रेऽस्मिन् द्वे पदे स्तः। ऋतः छन्दसि इति सूत्रगतपदच्छेदः। ऋतः इति पञ्चम्यन्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। न संज्ञायाम् इत्यस्मात् सूत्रात् न इति पदमत्रानुवर्तते। उरः प्रभृतिभ्यः कप् इति सूत्रात् कप् इत्यनुवर्तते। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् इत्यस्मात् सूत्रात् बहुव्रीहौ इति पदमनुवर्तते। प्रातिपदिकात् प्रत्ययः परः चेति अधिकृतमस्ति। अत्र ऋतः प्रातिपदकात् चेति द्वयं समानविभक्तिकं पदम्। ऋतः इति विशेषणम्। प्रातिपदिकात् इति विशेष्यम्। अतः येन विधिस्तदन्तस्य इत्यनेन तदन्तविधौ ऋदन्तात् प्रातिपदिकात् इत्यर्थो लभ्यते। ततश्च सूत्रार्थो भवति छन्दसि बहुव्रीहौ ऋदन्तात् प्रातिपदिकात् कप्-प्रत्ययो न भवतीति।

उदाहरणम्- उभयतोदतः प्रतिगृह्णाति।

सूत्रार्थसमन्वयः - उभयतः दन्ताः सन्ति अस्य इति विग्रहे बहुव्रीहिसमासे कृते उत्तरपदस्य दन्तशब्दस्य दतृ इत्यस्मिन् आदेशे प्रकियाकार्ये उभयतोदतः इति रूपं सिद्ध्यति।

२०.७) तुजादीनां दीर्घोऽभ्यासस्य॥ (६.१.७)

सूत्रार्थः- तुजादीनाम् अभ्यासस्य दीर्घः स्यात्।

सूत्रावतरणम्- तुज्-प्रभृतिधातूनाम् अभ्यासस्य दीर्घविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति। तुजादीनाम् दीर्घः अभ्यासस्य इति सूत्रगतपदच्छेदः। तुजादीनाम् इति षष्ठ्यन्तं पदम्। दीर्घः इति प्रथमान्तं पदम्। अभ्यासस्य इति षष्ठ्यन्तं पदम्। अभ्यासः इति एका संज्ञा। द्विरुक्तस्य पूर्वस्य पूर्वोऽभ्यासः इत्यनेन अभ्याससंज्ञा विधीयते। धातोः इति पदमनुवर्तते। तच्च षष्ठीबहुवचनान्ततया विपरिणमते। ततश्च सूत्रार्थो भवति तुजादीनां धातूनाम् अभ्यासस्य दीर्घः स्यादिति।

उदाहरणम्- तुज्-धातोः लिट्-लकारे कानच्-प्रत्यये अनुबन्धलोपे तुज् आन इति स्थिते द्वित्वे तुज् तुज् आन इति स्थिते पूर्वोऽभ्यासः इति सूत्रेण द्विरुक्तस्य पूर्वस्य तुज्-इत्यस्य अभ्याससंज्ञायां हलादिः शेषः इत्यनेन सूत्रेण अभ्यासस्य आदेः हलः शेषे तु तुज् आन इति स्थिते प्रकृतसूत्रेण अभ्यास्य उकारस्य ह्रस्वस्य दीर्घे तू तुज् आन इति स्थिते संयागे निष्पन्नस्य तूतुजान इति शब्दस्वरूपस्य कृदन्तत्वात् कृत्तद्धितसमासाश्च इत्यनेन तस्य प्रातिपदिकसंज्ञायां ततश्च ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च चेत्यधिकृत्य प्रवर्तमानेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इति सूत्रेण खले कपोतन्यायेन एकविंशतिस्वादिप्रत्ययेषु प्राप्तेषु प्रथमैकवचनविवक्षायां सुप्रत्यये सुप्रत्ययस्य उकारस्य उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञायां तस्य लोपः इति सूत्रेण तस्य लोपे तूतुजान स् इति जाते समुदायस्य सुबन्तत्वात् सुप्तिङन्तं पदम् इत्यनेन तस्य पदसंज्ञायां तदन्त्यस्य सकारस्य स्थाने ससजुषो रुः इत्यनेन रु इत्यादेशे अनुबन्धलोपे च तूतुजान र् इति जाते रेफात् परस्य वर्णाभावस्य विरामोऽवसानम् इति सूत्रेण अवसानसंज्ञायां अवसानपरकत्वाच्च् समुदायस्य अन्त्यस्य रेफस्य स्थाने खरवसानयोर्विसर्जनीयः इत्यनेन विसर्गादेशे सर्ववर्णसम्मेलने तूतुजानः इति रूपं सिध्यति।

२०.८) बहुलं छन्दसि॥ (६.१.३४)

सूत्रार्थः- ह्वः सम्प्रसारणं स्यात्।

सूत्रावतरणम्- छन्दसि ह्वः बहुलं सम्प्रसारणविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- द्विपदात्मकं विधिसूत्रमिदम्। बहुलमिति प्रथमान्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। ह्वः सम्प्रसारणम् इति सम्पूर्णं सूत्रमत्रानुवर्तते। ततश्च सूत्रार्थो भवति छन्दसि ह्वेञ् स्पर्धायाम् इति धातोः बहुलं सम्प्रसारणं स्यात् इति।

विशेषः- ननु किं नाम बहुलम् इति चेदुच्यते-

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति।। इति।

कारिकार्थः पूर्वोक्तः एव।

उदाहरणे सूत्रार्थसमन्वयः- आङ्पूर्वकात् ह्वेधातोः लट्-लकारे लस्य स्थाने लस्य इति सूत्रमधिकृत्य प्रवर्तमानेन तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् इति सूत्रेण खले कपोतन्यायेन अष्टादशसु तिबादिप्रत्ययेषु प्राप्तेषु उत्तमपुरुषैकवचनविवक्षायाम् इडागमे अनुबन्धलोपे आ ह्वे इ इति जाते इकारस्य अचोऽन्त्यादि टि इति सूत्रेण टिसंज्ञायां टित आत्मनेपदानां टेरे इत्यनेन टिसंज्ञकस्य इकारस्य एत्वे एकारे आ ह्वे ए इति स्थिते कर्तरि शप् इति सूत्रेण धातोः शप्प्रत्यये बहुलं छन्दसि (२.४.७३) इत्यनेन च शपः लुकि प्रकृतसूत्रेण बहुलम् सम्प्रसारणे वकारस्य उकारे आ ह् उ ए ए इति स्थिते उकारस्य प्रथम-एकारस्य च स्थाने संप्रसारणाच्च इति सूत्रेण पूर्वरूपैकादेशे उकारे आ ह् उ ए इति जाते अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इत्यनेन उकारस्य स्थाने उवङादेशे हलन्त्यम् इति सूत्रेण उवङ्-प्रत्ययान्त्यस्य ङकारस्य इत्संज्ञायां तस्य लोपः इत्यनेन च इत्संज्ञकस्य ङकारस्य लोपे वर्णसम्मेलने आहुवे इति रूपं सिध्यति।

बहुलम् छन्दसि (६.१.३४) इति पूर्वोक्तसूत्रेण बहुलम् सम्प्रसारणम् विधीयते। तस्मात् बहुलग्रहणात् क्वचित् सम्प्रसारणम् न भवति। यथा ह्वयामि मरुतः शिवान्, ह्वयामि विश्वान् देवान् इत्यादौ सम्प्रसारणाभावः।

२०.९) खिदेश्छन्दसि॥ (६.१.५२)

सूत्रार्थः- छन्दसि खिदेः विभाषा एचः आत्।

सूत्रावतरणम्- खिद्-धातोः विकल्पेन एचः आकारविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- द्विपदात्मकमिदं विधिसूत्रम्। खिदेः छन्दसि इति सूत्रगतपदच्छेदः। खिदेः इति षष्ठ्यन्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। विभाषा लीयतेः इति सूत्रात् विभाषा इति पदमनुवर्तते। आदेच उपदेशेऽशिति इति सूत्रात् आत् एचः इति पदद्वयमनुवर्तते। ततश्च सूत्रार्थो भवति छन्दसि खिदेः एचः विभाषा आत् स्यात् इति।

उदाहरणम्- खिद्-धातोः लिट्-लकारे लस्य स्थाने तिपि तिपः स्थाने णलादेशे अनुबन्धलोपे खिद् अ इति स्थिते खिद् इत्यस्य द्वित्वे खिद् खिद् अ इति स्थिते द्विरुक्तस्य पूर्वभागस्य पूर्वोऽभ्यासः

इत्यनेन अभ्याससंज्ञायां हलादिः शेषः इत्यनेन अभ्यासादिहल्शेषे खि खिद् अ इति स्थिते अभ्यासे चर्च इत्यनेन खकारस्य चकारे चि खिद् अ इति स्थिते खकारोत्तरस्य इकारस्य गुणे एकारे चि खेद् अ इति स्थिते प्रकृतसूत्रेण खेद् इत्यस्य एचः एकारस्य आकारे सर्ववर्णसम्मेलने **चिखाद** इति रूपम्। लोके तु **चिखिदे** इति रूपम्।

२०.१०) शीर्षंश्छन्दसि॥ (६.१.६०)

सूत्रार्थः- शिरस् शब्दस्य शीर्षन् स्यात्।

सूत्रावतरणम्- शिरस् शब्दस्य शीर्षन् इति निपातनविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- विधिसूत्रेऽस्मिन् द्वे पदे स्तः। शीर्षन् इति प्रथमान्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। निपात्यते इति आक्षेपात् लभ्यते। सिद्धप्रक्रियस्य निर्देशो हि निपातः। एवञ्च शीर्षन् इति छन्दसि निपात्यते इति। ननु कस्य इति चेदुच्यते शिरःशब्दस्य। ततश्च सूत्रार्थो भवति शिरस् शब्दस्य शीर्षन् इति छन्दसि निपात्यते इति।

उदाहरणम्- अस्य शब्दस्य च वेदे प्रयोगः यथा शीर्ष्णः शीष्णो जगतः इति।

२०.११) वा छन्दसि॥ (६.१.१०६)

सूत्रार्थः- दीर्घाज्जसि इचि च पूर्वसवर्णदीर्घो वा स्यात्।

सूत्रावतरणम्- छन्दसि दीर्घात् पूर्वसवर्णस्य जसि इचि च परे दीर्घविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- द्विपदात्मकमिदं विधिसूत्रम्। वा इति अव्ययपदम्। छन्दसि इति सप्तम्यन्तं पदम्। नादिचि इति सूत्रात् इचि इति पदमनुवर्तते। दीर्घाज्जसि च इति सम्पूर्णं सूत्रमत्रानुवर्तते। प्रथमयोः पूर्वसवर्णः इति सूत्रात् पूर्वसवर्णः इति पदमत्रानुवर्तते। ततश्च सूत्रार्थो भवति छन्दसि दीर्घात् पूर्वसवर्णदीर्घो वा स्यात् जसि इचि च इति।

उदाहरणम्- वाराह्यौ इत्युदाहरणम्। वाराहीशब्दात् प्रथमायाः द्वितीयायाः द्विवचने औप्रत्यये वाराही औ इति स्थिते दीर्घात् ईकारात् परम् इच्प्रत्याहारस्थः औकारः अस्ति अतः प्रकृतसूत्रेण पूर्वसवर्णदीर्घे **वाराही** इति रूपम् भवति। पूर्वसवर्णाभावे वाराही औ इति स्थिते इको यणचि इत्यनेन ईकारस्य स्थाने यकारे सर्ववर्णसम्मेलने **वाराह्यौ** इति रूपम्। लोके तु पूर्वसवर्णनिषेधः तेन वाराह्यौ इत्येव रूपम्।

२०.१२) शेश्छन्दसि बहुलम्॥ (६.१.७०)

सूत्रार्थः- छन्दसि शेः बहलं लोपः स्यात्।

सूत्रावतरणम्- छन्दसि शेः बाहुल्येन लोपविधानाय सूत्रमिदं प्रणीतम्।

सूत्रव्याख्या- त्रिपदात्मकं विधिसूत्रमिदम्। शेः छन्दसि बहुलम् इति सूत्रगतपदच्छेदः। शेः इति षष्ठ्यन्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। बहुलमिति अव्ययपदम्। लोपो व्योर्वलि इत्यस्मात् सूत्रात्

लोपः इति पदमनुवर्तते। भवति इति पदमध्याह्रियते। ततश्च सूत्रार्थो भवति छन्दसि शेः बहुलं लोपः स्यात् इति। बहुलशब्दार्थः पूर्वोक्त एव।

उदाहरणम्- यत्-शब्दस्य क्लीवलिङ्गे जस्-प्रत्यये यत् जस् इति स्थिते जश्शसोः शिः इत्यनेन जसः स्थाने शि-प्रत्ययादेशे यत् शि इति स्थिते प्रकृतसूत्रेण बाहुल्येन शेः लोपे त्यदादीनामः इत्यनेन तकारस्य स्थाने अकारे य अ इति स्थिते अतो गुणे इत्यनेन पररूपैकादेशे य इति स्थिते नपुंसकस्य झलचः इत्यनेन नुमागमे अनुबन्धलोपे यन् इति स्थिते सर्वनामस्थाने चासम्बुद्धौ इत्यनेन उपधादीर्घे नकारस्य लोपे **या** इति रूपम् सिध्यति। लोके तु **यानि** इति रूपम्।

पाठगतप्रश्नाः-१

१. नान्तादसंख्यादेः परस्य डटः के आगमा भवन्ति।।
२. मत्वर्थे विनिः केन भवति।
३. बहुप्रजाः इत्यस्य निपातविधानार्थं सूत्रं किम्।
४. छन्दसि च इति सूत्रेण किं भवति।
५. ऋतश्छन्दसि इति सूत्रेण किं भवति।
६. छन्दसि खिदेः एचः आत्-आदेशो वैकल्पिको न वा।
७. शिरस्-शब्दस्य शीर्षन् इति केन निपात्यते।

२०.१३) अङ्ग इत्यादौ च॥ (६.१.११९)

सूत्रार्थः - अङ्गशब्दे यः एङ् तदादौ च अकारे यः एङ् पूर्वः सोऽति प्रकृत्या यजुषि।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण प्रकृतिवद्भावो विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। अङ्ग इति सप्तम्यन्तं पदम् (अत्र लोपः शाकल्यस्य इति सूत्रेण यकारलोपः)। च इति अव्ययपदम्। एङः पदान्तादति इति सूत्रात् एङः इति अति चेति पदद्वयमनुवर्तते। प्रकृत्यान्तः पादमव्यपरे इति सूत्रात् प्रकृत्या इति अनुवर्तते। यजुष्युरः इति सूत्रात् यजुषि इत्यनुवर्तते। संहितायामित्यधिकारः। ततश्च सूत्रार्थो भवति यजुषि विषये अङ्गशब्दस्य य एङ् सः अति परे प्रकृत्या स्यात् संहितायाम् इति।

उदाहरणम् - प्राणो अङ्गे अङ्गे अदीव्यत् इत्युदाहरणम्।

सूत्रार्थसमन्वयः - प्राणो अङ्गे अङ्गे अदीव्यत् इत्युदाहरणे प्राणो अङ्गे इत्यत्र अङ्गे इति एङः परमस्ति अतः प्रकृतसूत्रेण प्रकृतिवद्भावो भवति। अङ्गे अङ्गे इत्यत्र अङ्गे-पदात् परं यदि अकारः तिष्ठति तर्हि अङ्गे इत्यस्य एङः: प्रकृतिवद्भावो भवति इत्यर्थेन प्रकृतिवद्भावो भवति।

२०.१४) अवपथासि च॥ (६.१.१२१)

सूत्रार्थः - अनुदात्ते अकारादौ अवपथाःशब्दे परे यजुषि एङ् प्रकृत्या।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण प्रकृतिवद्भावो विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। अवपथासि इति सप्तम्यन्तं पदम्। च इति अव्ययपदम्। एङः पदान्तादति इति सूत्रात् एङः, अति चेति पदद्वयमनुवर्तते। प्रकृत्यान्तः पादमव्यपरे इति सूत्रात् प्रकृत्या इति अनुवर्तते। यजुष्युरः इति सूत्रात् यजुषि इत्यनुवर्तते। अनुदात्ते च कुधपरे इति सूत्रात् अनुदात्ते इति पदमनुवर्तते। ततश्च सूत्रार्थो भवति अनुदात्ते अति च अवपथास्-शब्दे परतः एङ् प्रकृत्या भवति यजुषि इति।

उदाहरणम् - त्रीरुद्रेभ्यो अवपथाः।

सूत्रार्थसमन्वयः - पूर्वोक्ते उदाहरणे त्रीरुद्रेभ्यो इत्यत्र यकारोत्तरवर्तिनः ओकारस्य प्रकृतिवद्भावः। यतो हि अवपथाः (वप्धातोः लङि मध्यमपुरुषैकवचनान्तम् रूपम्) इत्यत्र वकारात् पूर्ववर्तिनः अकारः अनुदात्तः। किञ्च ह्रस्वः अकारोऽपि वर्तते।

२०.१५) स्यश्छन्दसि बहुलम्॥ (६.१.१३३)

सूत्रार्थः - स्य इत्यस्य सोर्लोपः स्याद्धलि।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण सुलोपो विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। स्यः छन्दसि बहुलम् इति सूत्रगतपदच्छेदः। स्यः इति लुप्तषष्ठ्यन्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। बहुलमिति प्रथमान्तं पदम्। एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इति सूत्रात् हलि इति सुलोपः चेति पदद्वयमनुवर्तते। ततश्च सूत्रार्थो भवति स्य-इत्यस्य सुलोपः स्यात् हलि इति।

उदाहरणम् - एष स्य भानुः इत्युदाहरणम्।

सूत्रार्थसमन्वयः - स्य भानुः इत्यत्र त्यद्-शब्दात् सुविभक्तौ त्यदादीनामः इत्यनेन दकारस्य स्थाने अकारादेशे त्य अ स् इति जाते पररूपैकादेशे त्य स् इति स्थिते तदोः सः सावनन्त्ययोः इति सूत्रेण तकारस्य सकारे स्य स् इति स्थिते हलि भकारे परतः प्रकृतसूत्रेण सोः सकारस्य लोपे स्य भानुः इति रूपम्। एवम् अग्रेऽपि बोध्यम्।

२०.१६) ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे॥ (६.१.१५१)

सूत्रार्थः - ह्रस्वात्परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागमः स्यान्मन्त्रे।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण सुडागमो विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। ह्रस्वात् चन्द्रोत्तरपदे मन्त्रे इति सूत्रगतपदच्छेदः। ह्रस्वात् इति पञ्चम्यन्तं पदम्। चन्द्रोत्तरपदे इति सप्तम्यन्तं पदम्। चन्द्र उत्तरपदं यस्य तत् चन्द्रोत्तरपदम् तस्मिन् चन्द्रोत्तरपदे इति बहुव्रीहिसमासः। मन्त्रे इति सप्तम्यन्तं पदम्। सुट्-कात् पूर्वः इति सूत्रात् सुट् इति पदमनुवर्तते। ततश्च सूत्रार्थो भवति ह्रस्वात् परस्य चन्द्रशब्दोत्तरपदस्य सुडागमः स्यात् मन्त्रे इति।

उदाहरणम् - हरिश्चन्द्रः इत्युदाहरणम्।

सूत्रार्थसमन्वयः - हरिश्चन्द्रो यस्मिन् इति विग्रहे प्रक्रियया हरि चन्द्र इति स्थिते प्रकृतसूत्रेण ह्रस्वात् परस्य चन्द्रोत्तरपदस्य सुडागमे सुटः टित्वात् आद्यन्तौ टकितौ इति परिभाषया परिष्कृतेन हरि

सुट् चन्द्र इति स्थिते स्तोः श्चुना श्चुः इत्यनेन सकारस्य शकारे संयोगे निष्पन्नात् हरिश्चन्द्रप्रातिपदिकात् सौ विभक्तिकार्ये हरिश्चन्द्रः इति रूपम्।

२०.१७) पितरामातरा च छन्दसि॥ (६.३.३३)

सूत्रार्थः - द्वन्द्वे निपातः।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति। पितरामातरा इति प्रथमान्तं पदम्। च इति अव्ययपदम्। छन्दसि इति सप्तम्यन्तं पदम्। देवताद्वन्द्वे च इति सूत्रात् द्वन्द्वे इति पदमनुवर्तते। निपात्यते इत्याक्षिप्यते। ततश्च सूत्रार्थो भवति छन्दसि द्वन्द्वे पितरामातरा निपात्यते इति।

उदाहरणम् - आ मा गन्तां पितरामातरा च इति।

सूत्रार्थसमन्वयः - पिता च माता च इति विग्रहे प्रक्रियया पितृ मातृ इति स्थिते प्रकृतसूत्रेण **पितरामातरा**शब्दः निपात्यते। लोके **पितरौ, मातापितरौ** चेति रूपद्वयं भवति।

२०.१८) सध मादस्थयोश्छन्दसि॥ (६.३.९६)

सूत्रार्थः - सहस्य सध-आदेशः स्यात्।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् त्रीणि पदानि सन्ति। सध इति अविभक्तिकं पदम्। मादस्थयोः इति सप्तम्यन्तं पदम्। छन्दसि इति सप्तम्यन्तं पदम्। सहस्य सध्रि इति सूत्रात् सहस्य इति पदमनुवर्तते। ततश्च सूत्रार्थो भवति सहस्य सध इत्यादेशः स्यात् मादस्थयोः परयोः छन्दसि इति।

उदाहरणम् - सधस्थम् इत्युदाहरणम्।

सूत्रार्थसमन्वयः - सह तिष्ठति इति विग्रहे सह स्था इति स्थिते आतोऽनुपसर्गे कः इति सूत्रेण कप्रत्यये सह स्था क इति स्थिते अनुबन्धलोपे सह स्था अ इति स्थिते कप्रत्ययस्य कित्त्वात् आतो लोप इटि च इति सूत्रेण स्था इत्यस्य आकारस्य लोपे सह स्थ् अ इति जाते प्रकृतसूत्रेण सहस्य सधादेशे सध स्थ् अ इति जाते संयोगे निष्पन्नात् सधस्थ-प्रातिपदिकात् सौ विभक्तिकार्ये **सधस्थः** इति रूपम्। अम्-विभक्तौ **सधस्थम्** इति रूपम् सिध्यति।

२०.१९) छन्दसि च॥ (६.३.१२६)

सूत्रार्थः - अष्टन आत्वं स्यादुत्तरपदे।

सूत्रव्याख्या - विधिसूत्रेऽस्मिन् द्वे पदे स्तः। छन्दसि इति सप्तम्यन्तं पदम्। च इति अव्ययपदम्। अष्टनः संज्ञायाम् इति सूत्रात् अष्टनः इति पदमनुवर्तते। ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रात् दीर्घः इति पदमनुवर्तते। ततः अचश्च इति परिभाषया अचः इति षष्ठ्यन्तम् पदम् लभ्यते। ततश्च सूत्रार्थो भवति छन्दसि अष्टनः अचः दीर्घः (आत्वमेव स्यात् उत्तरपदे)। अचः आद्यस्य अन्त्यस्य वा कस्य स्थाने दीर्घः इति पृच्छायाम् उच्यते अलोऽन्त्यस्य इति परिभाषया अन्त्यस्यैव अलः स्थाने इत्यर्थलाभात् अष्टनः अन्त्यस्यैव अचः स्थाने दीर्घो भवति उत्तरपदे परतः वेदविषये इति सम्पूर्णार्थः लभ्यते।

उदाहरणम् - अष्टापदी इत्युदारहणम्।

सूत्रार्थसमन्वयः - अष्टौ पादाः यस्याः इति विग्रहे प्रक्रियया अष्टन् पाद इति स्थिते नलोपः प्रातिपदिकस्य इति सूत्रेण नकारस्य लोपे अष्ट पाद इति जाते प्रकृतसूत्रेण पाद इति उत्तरपदे परतः अष्टनः टकारोत्तरवर्तिनः अकारस्य दीर्घे आत्त्वे अष्टापाद इति जाते अलोऽन्त्यस्य इति परिभाषया परिष्कृतेन संख्या सुपूर्वस्य इत्यनेन दकारोत्तराकारलोपे स्त्रीत्वविवक्षायां पादोऽन्यतरस्याम् इत्यनेन विकल्पेन ङीप्-प्रत्यये अष्टापादी इति स्थिते सौ विभक्तिकार्ये अष्टापादी इति रूपम्।

२०.२०) मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ॥ (६.३.१३१)

सूत्रार्थः - मन्त्रे सोम-अश्व-इन्द्रिय-विश्वदेव्य इत्येतेषाम् दीर्घः स्यात् मतुप्-प्रत्यये परे।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण दीर्घः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। मन्त्रे इति सप्तम्यन्तं पदम्। सोमाश्वेन्द्रियविश्वदेव्यस्य इति षष्ठ्यन्तं पदम्। मतौ इति सप्तम्यन्तं पदम्। मतौ इत्यस्य मतुप्-प्रत्यये इत्यर्थः। ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रात् दीर्घः इति पदमनुवर्तते। ततश्च सूत्रार्थो भवति मन्त्रे सोम-अश्व-इन्द्रिय-विश्वदेव्य इत्येतेषाम् मतुप्-प्रत्यये दीर्घः स्यात् इति। कस्य दीर्घः इति आकाङ्क्षायामुच्यते - अचश्च इति परिभाषया अचः इति षष्ठ्यन्तम् पदम् लभ्यते। अचः आद्यस्य अन्त्यस्य वा कस्य स्थाने दीर्घः इति पृच्छायाम् उच्यते अलोऽन्त्यस्य इति परिभाषया अन्त्यस्यैव अलः स्थाने इत्यर्थलाभात् मन्त्रे सोम-अश्व-इन्द्रिय-विश्वदेव्य इत्येतेषाम् अन्त्यस्य अचः दीर्घः स्यात् मतुप्-प्रत्यये इति सम्पूर्णार्थः लभ्यते।

उदाहरणम् - सोमावती इत्युदाहरणम्।

सूत्रार्थसमन्वयः - सोमः अस्याम् अस्ति इति विग्रहे सोमशब्दात् तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रेण मतुप्-प्रत्यये सोम मत् इति स्थिते मादुपधायाश्च मतोर्वोऽयवादिभ्यः इत्यनेन मकारस्य वकारे सोम वत् इति स्थिते मतुपः उगित्त्वात् उगितश्च इत्यनेन ङीप्-प्रत्यये अनुबन्धलोपे सोमवत् ई इति स्थिते प्रकृतसूत्रेण मकारोत्तराकारस्य दीर्घे आकारे संयोगे निष्पन्नात् सोमावतीशब्दात् सौ विभक्तिकार्ये सोमावती इति रूपम्।

२०.२१) ओषधेश्च विभक्तावप्रथमायाम्॥ (६.३.१३२)

सूत्रार्थः - मन्त्रे ओषधिशब्दस्य दीर्घः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण दीर्घः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। ओषधेः च विभक्तौ अप्रथमायाम् इति सूत्रगतपदच्छेदः। न प्रथमा अप्रथमा। अर्थात् प्रथमा-भिन्ना इत्यर्थः। तच्च विभक्तौ इत्यस्य विशेषणम् अस्ति। तेन प्रथमा-भिन्नद्वितीयादिविभक्तौ इति लभ्यते। ओषधेः इति षष्ठ्यन्तं पदम्। च इति अव्ययपदम्। विभक्तौ इति सप्तम्यन्तं पदम्। अप्रथमायाम् इति सप्तम्यन्तं पदम्। तच्च विभक्तौ इत्यस्य विशेषणम्। मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ इति सूत्रात् मन्त्रे इति पदमनुवर्तते। ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रात् दीर्घः इति पदमनुवर्तते। अचश्च अलोऽन्त्यस्य इति परिभाषाभ्याम् अन्त्यस्य अचः दीर्घः इत्यर्थलाभः। तथा च सूत्रार्थस्तावत् - मन्त्रे ओषधिशब्दस्य अन्त्यस्य अचः दीर्घः स्यात् इति।

उदाहरणम् - ओषधीभ्यः इत्युदाहरणम्।

सूत्रार्थसमन्वयः - ओषधिशब्दात् भ्यस्-प्रत्यये ओषधि भ्यस् इति स्थिते प्रकृतसूत्रेण ओषधिशब्दस्य अन्त्यस्य अचः इकारस्य दीर्घे ओषधी भ्यस् इति स्थिते सकारस्य रुत्वे विसर्गे ओषधीभ्यः इति रूपम् सिध्यति।

२०.२२) इकः सुञि॥ (६.३.१३४)

सूत्रार्थः - ऋचि दीर्घ इत्येव।

सूत्रावतरणम् - ऋचि विषये इकः सुञि परे दीर्घविधानार्थं सूत्रमिदं विरचितम्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण दीर्घः विधीयते। द्विपदात्मके अस्मिन् सूत्रे इकः इति षष्ठ्यन्तं पदम्। सुञि इति सप्तम्यन्तं निपातसंज्ञकं पदम्। ऋचि तु-नु-घ-मक्षु-तङ्-कुत्रो-रुष्याणाम् इति सूत्रात् ऋचि इति विषयसप्तम्यन्तं पदम् अनुवर्तते। ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रात् अत्र दीर्घः इति पदम् अनुवर्तते। एवमत्र पदयोजना ऋचि सुञि इकः दीर्घः इति। ततश्च सूत्रार्थो भवति- ऋग्विषये इकः दीर्घः स्यात् सुञि परे इति। अतः अनेन सूत्रेण ऋग्वेदे सुञि परतः इकः दीर्घो भवति।

उदाहरणम् - अभीषुणः।

सूत्रार्थसमन्वयः - ऋग्वेदे अभीषुणः इति पदं वर्तते। एवञ्च अत्र ऋचि विषये अभि इत्यस्य इकः इकारात् परे सुञ् इति निपातः वर्तते। तस्मात् अनेन सूत्रेण तस्य इकः इकारस्य स्थाने दीर्घे ईकारे सूञः इति सूत्रेण सकारस्य स्थाने षकारे नश्च धातुस्थोरुषुभ्यः इति सूत्रेण च नकारस्य णकारे अभीषुणः इति रूपं सिध्यति।

२०.२३) द्व्यचोऽतस्तिङः॥ (६.३.१३५)

सूत्रार्थः - मन्त्रे दीर्घः।

सूत्रावतरणम्- ऋचि मन्त्रे द्व्यचः तिङन्तस्य अतः दीर्घविधानार्थं सूत्रमिदम्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण दीर्घः विधीयते। अस्मिन् सूत्रे द्व्यचः अतः तिङः इति पदच्छेदः। त्रिपदात्मके अस्मिन् सूत्रे द्व्यचः, अतः, तिङः चेति त्रीणि पदानि षष्ठ्येकवचनान्तानि। अस्मिन् सूत्रे ऋचि तु-नु-घ-मक्षु-तङ्-कुत्रो-रुष्याणाम् इति सूत्रात् ऋचि इति विषयसप्तम्यन्तं पदम् अनुवर्तते। ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रात् अत्र दीर्घः इति पदम् अनुवर्तते। किञ्च मन्त्रे सोमाश्वेन्द्रिय-विश्व-देव्यस्य मतौ इति सूत्रात् मन्त्रे इति सप्तम्यन्तं पदम् अनुवर्तते। एवञ्च अत्र पदयोजना इत्थम्- ऋचि मन्त्रे द्व्यचः तिङः अतः दीर्घः इति। ततश्च सूत्रार्थो भवति- ऋग्विषये मन्त्रे द्व्यचः तिङन्तस्य अतः स्थाने दीर्घः स्यात् इति।

उदाहरणम् - विद्मा।

सूत्रार्थसमन्वयः - विद ज्ञाने इति अदादिगणे पठितात् विद्-धातोः कर्तरि लटि मसि शपि शपो लुकि विद् मस् इति स्थिते विदो लटो वा इति सूत्रेण मसः स्थाने म-इत्यादेशे विद्म इति रूपं भवति। अत्र

विद्म इति तिङन्तं पदं द्व्यच्कम्। अतः ऋग्विषये मन्त्रे विद्म इति तिङन्तस्य पदस्य अन्त्यस्य अकारस्य स्थाने प्रकृतसूत्रेण दीर्घे आकारे विद्मा इति रूपं सिध्यति।

पाठगतप्रश्नाः-२

८. प्राणो अङ्गे इत्यादौ सन्धिः कुतो न भवति।

९. अङ्ग इत्यादौ च इति सूत्रे अङ्ग इत्यत्र का विभक्तिः।

१०. स्यः इति कीदृशं पदम्।

११. एष स्य भानुः इति वाक्ये स्य-इत्युत्तरसुलोपः केन।

१२. पितरामातरा इति शब्दः साधु न वा।

१३. सध इति कीदृशं पदम्।

१४. ओषधीभ्यः इत्यत्र ईकार कुतः।

१५. कस्मिन् वेदे सुञि परे इकः दीर्घः भवति।

१६. विद्मा इत्यत्र अकारस्य दीर्घः केन सूत्रेण।

पाठसारः

पाठेऽस्मिन् ये विषया एतावता आलोचिताः ते अधुना संक्षेपेण उच्यन्ते। यथा नान्तादसंख्यादेः परस्य डटः थट् मट् च आगमौ भवतः। मत्वर्थे विनिप्रत्ययो भवति बहुलं छन्दसि इति सूत्रेण। छन्दसि बहुव्रीहौ बहुप्रजाः इति शब्दः निपात्यते। बहुव्रीहौ दन्तस्य दतृ-आदेशः भवति छन्दसि च इति सूत्रेण। छन्दसि ऋदन्तात् प्रातिपदिकात् बहुव्रीहेः कप्-प्रत्ययः न भवति। तुजादीनाम् दीर्घोऽभ्यासस्य इति सूत्रेण तुजादीनाम् अभ्यासस्य दीर्घो भवति। छन्दसि खिदेः विकल्पेन एचः आकारो भवति खिदेश्छन्दसि इति सूत्रेण। शीर्षंश्छन्दसि इति सूत्रेण शिरस् शब्दस्य शीर्षन् इति निपातो भवति। पुनः दीर्घाज्जसि इचि च पूर्वसवर्णदीर्घो भवति विकल्पेन। सहस्य सधादेशः सध मादस्थयोश्छन्दसि इति सूत्रेण भवति। ऋचि विषये इकः सुञि परे दीर्घः भवति इकः सुञि इति सूत्रेण। छन्दसि बाहुल्येन शेः लोपः भवति। ऋचि विषये इकः सुञि परे दीर्घो भवति इकः सुञि इति सूत्रेण। इत्येते विषयाः अस्मिन् पाठे अतीव सारल्येन आलोचिताः।

पाठान्तप्रश्नाः

१. वा छन्दसि इति सूत्रं व्याख्यात।

२. ऋचश्छन्दसि इति सूत्रं व्याख्यात।

३. हरिश्चन्द्रः इति रूपं साधयत।

४. अङ्ग इत्यादौ च इति सूत्रं व्याख्यात।

५. विद्मा इति रूपं साधयत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तरकूटः-१

१. स्थट् इति मट् इति च।

२. बहुलं छन्दसि इत्यनेन।

३. बहुप्रजाश्छन्दसि च इति सूत्रेण।

४. दन्तशब्दस्य दतृ इति आदेशो विधीयते।

५. ऋदन्तात् बहुव्रीहेः कप् निषिध्यते।

६. वैकल्पिकः।

७. शीर्षंश्छन्दसि इति सूत्रेण।

उत्तरकूटः-२

८. अङ्ग इत्यादौ च इति सूत्रकृतनियमात्।

९. अङ्ग इत्यादौ च इति सूत्रे अङ्ग इत्यत्र सप्तमीविभक्तिः।

१०. स्यः इति लुप्तषष्ठ्यन्तं पदम्।

११. स्यश्छन्दसि बहुलम् इति सूत्रेण।

१२. साधु रूपम् एतत्।

१३. अविभक्तिकं पदम्।

१४. ओषधेश्च विभक्तावप्रथमायाम् इति सूत्रेण भवति।

१५. ऋग्वेदे।

१६. द्व्यचोऽतस्तिङः इति सूत्रेण।

इति विंशः पाठः